सूत उवाच ।
“असारभूते संसारे सारमेकं विनिर्द्दिशेत् ।
असाराशेषलोकस्य सारमाराधनं हरेः ॥
दद्यात् पुरुषसूक्तेन यः पुष्पाण्यप एव वा ।
अर्च्चितं स्यात्तदा चैव तेन सर्व्वं चराचरम् ॥
मातृवत् परिरक्षन्तं सृष्टिसंहारकारकम् ।
यो न पूजयते विष्णुं तं विद्याद्ब्रह्मघातकम् ॥
यतः प्रवृत्तिर्भूतानां येन सर्व्वमिदं ततम् ।
स्वकर्म्मणा तमभ्यर्च्च्य सिद्धिं विन्दन्ति मानवाः ॥
नरके पच्यते यस्तु यमेन परिभाषितः ।
किं त्वया नार्च्चितो देवः केशवः क्लेशनाशनः ॥
उदकेनाप्यभावेन द्रव्याणामर्च्चितः प्रभुः ।
यो ददाति स्वकं लोकं स त्वया किं न चार्च्चितः ॥
न तत् करोति सा माता न पिता नापि बान्धवाः ।
यत् करोति हृषीकेशः सन्तुष्टः श्रद्धयार्च्चितः ॥
वर्णाश्रमाचारवता पुरुषेण परः पुमान् ।
विष्णुराराध्यते पन्था नान्यस्तत्तोषकारकः ॥
न दानैर्विविधैर्दत्तैर्न पुष्पैर्नानुलेपनैः ।
तोषमेति महात्मासौ यथा भक्त्या जनार्द्दनः ॥
सम्पदैश्वर्य्यमाहात्म्यज्ञानसन्ततिकर्म्मणाम् ।
विमुक्तेश्चैकतालभ्यं मूलमाराधनं हरेः ॥
प्रणामैस्तुष्यते विष्णुरेतद्वै परमं धनम् ।
अन्यथा वा विशेषेण कस्तमर्च्चितुमर्हति ॥”
इति गारुडे पूजास्तुतिः २१२ अध्यायः ॥*॥
सूत उवाच ।
“आलोक्य बहुशास्त्राणि विचार्य्य च पुनः पुनः ।
इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा ॥
किं तस्य दानैः किं तीर्थैः किं तपोभिः किमध्वरैः ।
यो नित्यं ध्यायते देवं नारायणमनन्यधीः ॥
षष्टितीर्थसहस्राणि षष्टितीर्थशतानि च ।
नारायणप्रणामस्य कलां नार्हन्ति षोड़शीम् ॥
प्रायश्चित्तान्यशेषाणि तपःकर्म्मादिकानि वै ।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥
कृते पापेऽनुतापो वै यस्य पुंसः प्रजायते ।
प्रायश्चित्तन्तु तस्यैकं हरिसंस्मरणं परम् ॥
मुहूर्त्तमपि यो ध्यायेन्नारायणमतन्द्रितः ।
सोऽपि सद्गतिमाप्नोति किं पुनस्तत्परायणः ॥
जाग्रत्स्वप्नसुषुप्तेषु योगस्तस्य च योगिनः ।
या काचिन्मनसो वृत्तिः सा भवत्यच्युताश्रयात् ॥
उत्तिष्ठन्निपतन्विष्णुं ब्रजन् वै विवशस्तथा ।
भुञ्जन् स्वपंश्च जाग्रच्च गोविन्दं माधवं स्मरेत् ॥
स्वे स्वे कर्म्मण्यभिरतः कुर्य्याच्चित्तं जनार्द्दने ।
एषा शास्त्रानुसारोक्तिः किमन्यैर्बहुभाषितैः ॥
ध्यानमेव परो धर्म्मो ध्यानमेव परं तपः ।
ध्यानमेव परं शौचं तस्मात् ध्यानपरो भवेत् ॥
नास्ति विष्णोः परं ध्येयं तपो नानशनात् परम् ।
तस्मात् प्रधानमत्रोक्तं वासुदेवस्य चिन्तनम् ॥
यद्दुर्लभं परं प्राप्यं मनसो यत्र गोचरम् ।
तदप्यप्रार्थितं ध्यातो ददाति मधुसूदनः ॥
प्रमादात् कुर्व्वतां कर्म्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः ॥
ध्यानेन सदृशं नास्ति शोधनं पापकर्म्मणाम् ।
आगामिदेहहेतूनां दाहकोऽप्येष पावकः ॥
विनिष्पन्नसमाधिस्तु मुक्तिमत्रैव जन्मनि ।
प्राप्नोति योगी योगाग्निदग्धकर्म्मचयोऽचिरात् ॥
यथाग्निरुद्धतशिखः कक्षं दहति सानिलः ।
तथा चित्तस्थितो विष्णुर्योगिनां सर्व्वकिल्विषम् ॥
यथाग्निदाहात् कनकमपदोषं प्रजायते ।
संश्लिष्टं वासुदेवेन मनुष्याणां तथा मनः ॥
गङ्गास्नानसहस्रेषु पुष्करस्नानकोटिषु ।
यत् पापं विलयं याति स्मृते नश्यति तद्धरौ ॥
प्राणायामसहस्रैस्तु यत् पापं नश्यति ध्रुवम् ।
क्षणमात्रेण तत् पापं हरेर्ध्यानात् प्रणश्यति ॥
एकस्मिन्नप्यतिक्रान्ते मुहूर्त्ते ध्यानवर्ज्जिते ।
दस्युभिर्म्मुषितेनेव युक्तमाक्रन्दितं भृशम् ॥
कलिप्रभावो दुष्टोक्तिः पाषण्डानां तथोक्तयः ।
न क्रमेरन् मनस्तस्य यस्य चेतसि केशवः ॥
सा तिथिस्तदहोरात्रं स योगः स च चन्द्रमाः ।
लग्नं तदेव विख्यातं यत्र संस्मर्य्यते हरिः ॥
सा हानिस्तन्महच्छिद्रं सा चान्धजड़मूकता ।
यन्मुहूर्त्तं क्षणं वापि वासुदेवो न चिन्त्यते ॥
कलिः कृतयुगन्तस्य कलिस्तस्य कृते युगे ।
हृदये यस्य गोविन्दो यस्य चेतसि नाच्युतः ॥
यस्याग्रतस्तथा पृष्ठे गच्छतस्तिष्ठतोऽपि वा ।
गोविन्दे नियतं चित्तं कृतकृत्यः सदैव सः ॥
वासुदेवे मनो यस्य जपहोमार्च्चनादिषु ।
तस्यान्तरायो मैत्रेय देवेन्द्रत्वादिकं फलम् ॥
असंख्या च गार्हस्थ्यमतप्ता च महत्तपः ।
छिनत्ति वैष्णवीं मायां केशवार्पितमानसः ॥
क्षमां कुर्व्वन्ति क्रुद्धेषु दयां मूर्खेषु मानवाः ।
मुदञ्च धर्म्मशीलेषु गोविन्दे हृदयस्थिते ॥
ध्यायेन्नारायणं देवं स्नानादिषु च कर्म्मसु ।
प्रायश्चित्तं हि सर्व्वस्य दुष्कृतस्येति विश्रुतम् ॥
लाभस्तेषां जयस्तेषां कुतस्तेषां पराभवः ।
येषामिन्दीवरश्यामो हृदयस्थो जनार्द्दनः ॥
कीटपक्षिगणानाञ्च हरौ संन्यस्तचेतसाम् ।
ऊर्द्ध्वमेव गतिं मन्ये किं पुनर्ज्ञानिनां नृणाम् ॥
वासुदेवतरुच्छाया नातिशीता न घर्म्मदा ।
नरकद्वारशमनी सा किमर्थं न सेव्यते ॥
न च दुर्व्वाससः शापो वज्रञ्चापि शचीपतेः ।
हन्तुं समर्थो हि सखे हृद्गते मधुसूदने ।
वदतस्तिष्ठतोऽन्यद्वा स्वेच्छया कर्म्म कुर्व्वतः ।
नापयाति यदा चिन्ता सिद्धां मन्ये च धारणाम् ॥

ध्येयः सदा सवितृमण्डलमध्यवर्त्ती
नारायणः सरसिजासनसन्निविष्टः ।
केयूरवान् कनककुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥

किमत्र बहुनोक्तेन युष्माकमधुना हरिम् ।
स्मरताहर्निशं विष्णुमशेषदुरितापहम् ॥
न हि ध्यानेन सदृशं पवित्रमिह विद्यते ।
श्वपाकेष्वपि भुञ्जानः पापं नैवात्र लिप्यते ॥
यदा चित्तं समासक्तं जन्तोर्व्विषयगोचरे ।
यदि नारायणेऽप्येवं को न मुच्येत बन्धनात् ॥
प्रत्यस्तमितभेदं यत् सत्तामात्रमगोचरम् ।
वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम् ॥
तच्चानया धारणया योगिनो यान्ति मे लयम् ।
संसारकर्म्मणोऽप्येते यान्ति निर्व्वाणतां द्विजाः ॥”
इति गारुडे ध्यानस्तुतिः २१४ अध्यायः ॥
तस्य माहात्म्यं यथा,—
सूत उवाच ।
“विष्णुचित्तो भवेद्भक्तस्तं यजेत नमेत् सदा ।
तमेवैष्यति मुक्तेवमात्मानं हरितत्परः ॥
तद्ध्यानं यत्र गोविन्दः सा कथा यत्र केशवः ।
तत् कर्म्म यत्तदर्थाय किमन्यैर्बहुभाषितैः ॥
सा जिह्वा या हरिं स्तौति तच्चित्तं यत्तदर्पितम् ।
तावेव केवलौ श्लाघ्यौ यौ तत्पूजाकरौ करौ ॥

प्रणामशीलस्य शिरःफलं विदु-
स्तदर्चनं पाणिफलं दिवौकसः ।
मनःफलं तद्गुणकर्म्मचिन्तनं
वाचस्तु गोविन्दगुणस्तवः फलम् ॥

मेरुमन्दरमात्रोऽपि राशिः पापस्य कर्म्मणः ।
केशवं वैद्यमासाद्य दुर्व्याधिरिव नश्यति ॥
यत्किञ्चित् कुरुते कर्म्म पुरुषः साध्वसाधु वा ।
सर्व्वं नारायणे न्यस्य कुर्व्वन्नपि न लिप्यते ॥
ब्रह्मादिचतुरास्यान्तं भूतग्रामं चतुर्व्विधम् ।
चराचरं जगत् सर्व्वं प्रसुप्तं मायया तव ॥
यस्मिन्न्यस्तमतिर्न याति नरकं स्वर्गोऽपि यच्चिन्तने
विघ्नो यत्र निवेशितात्ममनसो ब्राह्मोऽपि लोकोऽल्पकः ।
मुक्तिं चेतसि संस्थितो जड़धियां पुंसां ददात्यव्ययः
किञ्चित्रं दुरितं प्रयाति विलयं तत्राच्युते कीर्त्तिते ॥
महता पुण्यपण्येन येन क्रीतोऽखिलं ध्रुवम् ।
तस्य विष्णोः प्रसादेन इह कश्चित् प्रमुह्यति ॥
अग्निकार्य्यं जपं स्नानं विष्णोर्ध्यानञ्च पूजनम् ।
गन्तुं दुःखोदधेः पारं कुर्य्युर्यत्र भवन्ति ते ॥
राष्ट्रस्य शरणं राजा पितरौ बालकस्य च ।
धर्म्मश्च सर्व्वमर्त्त्यानां सर्व्वस्य शरणं हरिः ॥
ये नमन्ति जगद्योनिं वासुदेवं सनातनम् ।
न तेभ्यो विद्यते तीर्थमधिकं मुनिसत्तम ॥
अनर्घरत्नपूजान्तु कुर्य्यात् स्वाध्यायमेव च ।
तं समुद्दिश्य गोविन्दं ध्यानं नित्यमतन्द्रितः ॥
शूद्रं वा भगवद्भक्तं निषादं श्वपचं तथा ।
द्विजजातिसमं मन्ये न याति नरकं नरः ॥
आदरेण यथा स्तौति धनवन्तं धनेच्छया ।
तथा चेद्विश्वकर्त्तारं को न मुच्येत बन्धनात् ॥
यथा जातबलो वह्निर्दहत्यार्द्रमपीन्धनम् ।
तथाविधः स्मृतो विष्णुर्योगिनां सर्व्वकिल्विषम् ॥
प्रदीप्तं पर्व्वतं यद्वत् नाश्रयन्ति मृगादयः ।